सूर्यसिद्धान्तः

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने
समस्तजगदाधार मूर्तये ब्रह्मणे नमः १

अल्पावशिष्टे तु कृते मयो नाम महासुरः
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् २

वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम्
आराधयन् विवस्वन्तं तपस्तेपे सुदुश्चरम् ३

तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने
ग्रहाणां चरितं प्रादान्मयाय सविता स्वयम् ४

विदितस्ते मया भावस्तोषितस्तपसा ह्यहम्
दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत् ५

न मे तेजः सहः कश्चिदाख्यातुं नास्ति मे क्षणः
मदंशः पुरुषोऽयं ते निश्शेषं कथयिष्यति ६

इत्युक्त्वाऽन्तर्दधे देवः समादिश्यांशमात्मनः
स पुमान् मयमाहेदं प्रणतं प्राञ्जलिस्थितम् ७

शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम्
युगे युगे महर्षीणां स्वयमेव विवस्वता ८

शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः
युगानां वरिवर्तेन कालभेदोऽत्र केवलः ९

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते १०

प्राणादिः कथितो मूर्तस्त्रुटयाद्योऽमूर्तसंज्ञकः
षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता ११

नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा १२

ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते
मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते १३

सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्
तत् षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च १४

तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्
सूर्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः १५

सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्
कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया १६

युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः
क्रमात् कृतयुगादीनां षष्ठांशः सन्ध्ययोः स्वकः १७

युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते
कृताब्दसङ्ख्या तस्यान्ते सन्धिः प्रोक्तो जलप्लवः १८

ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश
कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः १९

इत्थं युगसहस्रेण भूतसंहारकारकः
कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती २०

परमायुः शतं तस्य तयाऽहोरात्रसङ्ख्यया

आयुषोऽर्धमितं तस्य शेषकल्पोऽयमादिमः २१

कल्पादस्माच्च मनवः षड् व्यतीताः ससन्धयः
वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः २२

अष्टाविंशाद्युगादस्माद्यातमेतत् कृतं युगम्
अतः कालं प्रसङ्ख्याय सङ्ख्यामेकत्र पिण्डयेत् २३

ग्रहर्क्षदेवदैत्यादि सृजतोऽस्य चराचरम्
कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः २४

पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः
जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः २५

प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः
परिणाहवशाद् भिन्ना तद्वशाद् भानि भुञ्जते २६

शीघ्रगस्तान्यथाऽल्पेन कालेन महताऽल्पगः
तेषां तु परिवर्तेन पौष्णान्ते भगणः स्मृतः २७

विकलानां कला षष्ठ्या तत्षष्ट्या भाग उच्यते
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते २८

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम् २९

इन्दो रसाग्नित्रित्रीषु सप्तभूधरमार्गणाः
दस्त्रत्र्यष्टरसाङ्काद्भिलोचनानि कुजस्य तु ३०

बुधशीघ्रस्य शून्यर्तुखादित्र्यङ्कनगेन्दवः
बृहस्पतेः खदस्त्राद्भि वेदषड्वह्नयस्तथा ३१

सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः ३२

चन्द्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा युगे
वामं पातस्य वस्वग्नियमाश्विशिखिदस्त्रकाः ३३

भानामष्टाद्विवस्वद्रित्रिद्विद्व्यष्टशरेन्दवः
भोदया भगणैः स्वैः स्वैरूनाः स्वस्वोदया युगे ३४

भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम्
रविमासोनितास्ते तु शेषाः स्युरधिमासकाः ३५

सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोज्झ्य तिथिघ्नयाः
उदयादुदयं भानोर्भूमिसावनवासरः ३६

वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो युगे
चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः ३७

षड्वह्नित्रिहुताशाङ्कतिथयश्चाधिमासकाः
तिथिघ्नया यमार्थाश्विद्व्यष्टव्योमशराश्विनः ३८

खचतुष्कसमुद्राष्ट कुपञ्च रविमासकाः
भवन्ति भोदया भानुभगणैरूनिताः क्वहाः ३९

अधिमासोनरात्र्यर्द्धचान्द्रसावनवासराः
एते सहस्रगुणिताः कल्पे स्युर्भगणादयः ४०

प्राग्गतेः सूर्यमन्दस्य कल्पे सप्ताष्टवह्नयः
कौजस्य वेदखयमा बौधस्याष्टर्तुवह्नयः ४१

खखरन्ध्राणि जैवस्य शौक्रस्यार्थगुणेषवः

गोऽग्नयः शनिमन्दस्य पातानामथ वामतः ४२

मनुदस्त्रास्तु कौजस्य बौधस्याष्टाष्टसागराः
कृताद्रिचन्द्रा जैवस्य त्रिखाङ्काश्च भृगोस्तथा ४३

शनिपातस्य भगणाः कल्पे यमरसर्तवः
भगणाः पूर्वमेवात्र प्रोक्ताश्चन्द्रोच्चपातयोः ४४

षण्मनूनां तु सम्पीडय कालं तत्सन्धिभिः सह
कल्पादिसन्धिना सार्धं वैवस्वतमनोस्तथा ४५

युगानां त्रिघनं यातं तथा कृतयुगं त्विदम्
प्रोज्झय सृष्टेस्ततः कालं पूर्वोक्तं दिव्यसङ्ख्यया ४६

सूर्याब्दसङ्ख्यया ज्ञेयाः कृतस्यान्ते गता ग्रमी
खचतुष्कयमाद्र्यग्निशररन्ध्रनिशाकराः ४७

ग्रत ऊर्ध्वममी युक्ता गतकालाब्दसङ्ख्यया
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः ४८

पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः
लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः ४९

द्विष्ठास्तिथिघ्नयाभ्यस्ताश्चान्द्रवासरभाजिताः
लब्धोनरात्रिरोहिता लङ्कायामार्धरात्रिकः ५०

सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः
सप्तभिः घ्नयितः शेषः सूर्याद्यो वासरेश्वरः ५१

मासाब्ददिनसङ्ख्याऽऽप्तं द्वित्रिघ्नं रूपसंयुतम्
सप्तोद्धृतावशेषौ तु विज्ञेयौ मासवर्षपौ ५२

यथा स्वभगणाभ्यस्तो दिनराशिः कुवासरैः
विभाजितो मध्यगत्या भगणादिर्ग्रहो भवेत् ५३

एवं स्वशीघ्रमन्दोच्चा ये प्रोक्ताः पूर्वयायिनः
विलोमगतयः पातास्तद्वच्चक्राद् विशोधिताः ५४

द्वादशघ्ना गुरोर्याता भगणा वर्तमानकैः
राशिभिः सहिताः शुद्धाः षष्ट्या स्युर्विजयादयः ५५

विस्तरेणैतदुदितं संक्षेपाद् व्यावहारिकम्
मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात् ५६

अस्मिन् कृतयुगस्यान्ते सर्वे मध्यगता ग्रहाः
विना तु पातमन्दोच्चान् मेषादौ तुल्यतामिताः ५७

मकरादौ शशाङ्कोच्चं तत्पातस्तु तुलादिगः
निरंशत्वं गताश्चान्ये नोक्तास्ते मन्दचारिणः ५८

योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु
तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत् ५९

लम्बज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः
तेन देशान्तराभ्यस्ता ग्रहभुक्तिर्विभाजिता ६०

कलादि तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्
रेखाप्रतीचीसंस्थाने प्रक्षिपेत् स्युः स्वदेशजाः ६१

राक्षसालयदेवौकः शैलयोर्मध्यसूत्रगाः
रोहीतकमवन्ती च यथा सन्निहितं सरः ६२

अतीत्योन्मीलनादिन्दोर्दृक्सिद्धिर्गणितागतात्

यदा भवेत् तदा प्राच्यां स्वस्थानं मध्यतो भवेत् ६३

अप्राप्य च भवेत् पश्चादेवं वापि निमीलनात्
तयोरन्तरनाडीभिर्हन्याद् भूपरिधिं स्फुटम् ६४

षष्ट्या विभज्य लब्धैस्तु योजनैः प्रागथापरैः
स्वदेशः परिधौ ज्ञेयः कुर्याद्देशान्तरं हि तैः ६५

वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽभ्यधिके भवेत्
तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत् ६६

इष्टनाडीगुणा भुक्तिः षष्ट्या भक्ता कलादिकम्
गते शोध्यं युतं गम्ये कृत्वा तात्कालिको भवेत् ६७

भचक्रलिप्ताशीत्यंशं परमं दक्षिणोत्तरम्
विक्षिप्यते स्वपातेन स्वक्रान्त्यन्तादनुष्णगुः ६८

तन्नवांशं द्विगुणितं जीवस्त्रिगुणितं कुजः
बुधशुक्रार्कजाः पातैर्विक्षिप्यन्ते चतुर्गुणम् ६९

एवं त्रिघनरन्ध्रार्करसार्कार्का दशाहताः
चन्द्रादीनां क्रमादुक्ता मध्यविक्षेपलिप्तिकाः ७०

इति श्रीसूर्यसिद्धान्ते मध्यमाधिकारः १

अथ स्पष्टाधिकारः २

अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः १

तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः
प्राक् पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम् २

प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत्
पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम् ३

ग्रहात् प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहम्
उच्चसंज्ञोऽपरार्धस्थस्तद्वत्पश्चान्मुखं ग्रहम् ४

स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद् ग्रहाः
तत् तेषु धनमित्युक्तं फलं पश्चान्मुखेष्वृणम् ५

दक्षिणोत्तरतोऽप्येवं पातो राहुः स्वरंहसा
विक्षिपत्येष विक्षेपं चन्द्रादीनामपक्रमात् ६

उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः
ग्रहं प्राग्भगणार्धस्थो याम्यायामपकर्षति ७

बुधभार्गवयोः शीघ्रात् तद्वत् पातो यदा स्थितः
तच्छीघ्राकर्षणात् तौ तु विक्षिप्येते यथोक्तवत् ८

महत्त्वान्मण्डलस्यार्कः स्वल्पमेवापकृष्यते
मण्डलाल्पतया चन्द्रस्ततो बह्वपकृष्यते ९

भौमादयोऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः
दैवतैरपकृष्यन्ते सुदूरमतिवेगिताः १०

अतो धनर्णं सुमहत् तेषां गतिवशाद्भवेत्
आकृष्यमाणास्तैरेवं व्योम्नि यान्त्यनिलाहताः ११

वक्राऽतिवक्रा विकला मन्दा मन्दतरा समा
तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः १२

तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरासमा
ऋज्वीति पञ्चधा ज्ञेया या वक्रा सातिवक्रगा १३

तत्तद्गतिवशान्नित्यं यथा दृक् तुल्यतां ग्रहाः
प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात् १४

राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते
तत्तद्विभक्तलब्धोनमिश्रितं तद् द्वितीयकम् १५

आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः
खण्डकाः स्युश्चतुर्विंशज्ज्यार्धपिण्डाः क्रमादमी १६

तत्त्वाश्विनोऽङ्काब्धिकृता रूपभूमिधरर्तवः
खाङ्काष्टौ पञ्चशून्येशा बाणरूपगुणेन्दवः १७

शून्यलोचनपञ्चैकाश्छिद्ररूपमुनीन्दवः
वियच्चन्द्रातिधृतयो गुणरन्ध्राम्बराश्विनः १८

मुनिषडयमनेत्राणि चन्द्राग्निकृतदस्रकाः
पञ्चाष्टविषयाक्षीणि कुञ्जराश्विनगाश्विनः १९

रन्ध्रपञ्चाष्टकयमा वस्वद्र्यङ्कयमास्तथा
कृताष्टशून्यज्वलना नगाद्रिशशिवह्नयः २०

षट्पञ्चलोचनगुणाश्चन्द्रनेत्राग्निवह्नयः

यमाद्रिवह्निज्वलना रन्ध्रशून्यार्णवाग्नयः २१

रूपाग्निसागरगुणा वस्वग्निकृतवह्नयः
प्रोज्झ्योत्क्रमेण व्यासार्धादुत्क्रमज्यार्धपिण्डकाः २२

मुनयो रन्ध्रयमला रसषट्का मुनीश्वराः
द्व्यष्टैका रूपषड्दस्राः सागरार्थहुताशनाः २३

खर्तुवेदा नवाद्र्यर्था दिङ्नागास्त्र्यर्थकुञ्जराः
नगाम्बरवियच्चन्द्रा रूपभूधरशङ्कराः २४

शरार्णवहुताशैका भुजङ्गाद्रिशरेन्दवः
नवरूपमहीध्रैका गजैकाङ्कनिशाकराः २५

गुणाश्विरूपनेत्राणि पावकाग्निगुणाश्विनः
वस्वर्णवार्थयमलास्तुरङ्गर्तुनगाश्विनः २६

नवाष्टनवनेत्राणि पावकैकयमाग्नयः
गजाग्निसागरगुणा उत्क्रमज्यार्धपिण्डकाः २७

परमापक्रमज्या तु सप्तरन्ध्रगुणेन्दवः
तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते २८

ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद् विशोध्य च
शेषं केन्द्रं पदं तस्माद् भुजज्या कोटिरेव च २९

गताद् भुजज्या विषमे गम्यात् कोटिः पदे भवेत्
यग्मे तु गम्याद् बाहुज्या कोटिज्या तु गताद् भवेत् ३०

लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिण्डकं गतम्
गतगम्यान्तराभ्यस्तं विभजेत् तत्त्वलोचनैः ३१

तदवाप्तफलं योज्यं ज्यापिण्डे गतसंज्ञके
स्यात् क्रमज्याविधिरयमुत्क्रमज्यास्वपि स्मृतः ३२

ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम्
सङ्ख्यातत्त्वाश्विसंवर्गे संयोज्य धनुरुच्यते ३३

रवेर्मन्दपरिध्यंशा मनवः शीतगो रदाः
युग्मान्ते विषमान्ते च नखलिप्तोनितास्तयोः ३४

युग्मान्तेऽर्थाद्रयः खाग्निसुराः सूर्या नवार्णवाः
ओजे द्व्यगा वसुयमा रदा रुद्रा गजाब्धयः ३५

कुजादीनामतः शैघ्र्या युग्मान्तेऽर्थाग्निदस्त्रकाः
गुणाग्निचन्द्राः खनगा द्विरसाक्षीणि गोऽग्नयः ३६

ओजान्ते द्वित्रियमला द्विविश्वे यमपर्वताः
खर्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्तिताः ३७

ओजयुग्मान्तरगुणा भुजज्या त्रिज्ययोद्धृता
युग्मवृत्ते धनर्णं स्यादोजादूनेऽधिके स्फुटम् ३८

तद्गुणे भुजकोटिज्ये भगणांशविभाजिते
तद्भुजज्याफलधनुर्मान्दं लिप्तादिकं फलम् ३९

शैघ्र्यं कोटिफलं केन्द्रे मकरादौ धनं स्मृतम्
संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलम् ४०

तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः
त्रिज्याभ्यस्तं भुजफल चलकर्णविभाजितम् ४१

लब्धस्य चापं लिप्तादिफलं शैघ्र्यमिदं स्मृतम्

एतदाद्ये कुजादीनां चतुर्थे चैव कर्मणि ४२

मान्दं कर्मैकमर्केन्द्वोर्भौमादीनामथोच्यते
शैघ्र्यं मान्दं पुनर्मान्दं शैघ्र्यं चत्वार्यनुक्रमात् ४३

मध्ये शीघ्रफलस्यार्धं मान्दमर्धफलं तथा
मध्यग्रहे मन्दफलं सकलं शैघ्र्यमेव च ४४

अजादिकेन्द्रे सर्वेषां शैघ्र्ये मान्दे च कर्मणि
धनं ग्रहाणां लिप्तादि तुलादावृणमेव च ४५

अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिर्विभाजिता
भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्रहेऽर्कवत् ४६

स्वमन्दभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः
दोर्ज्यान्तरादिकं कृत्वा भुक्तावृणधनं भवेत् ४७

ग्रहभुक्तेः फलं कार्यं ग्रहवन्मन्दकर्मणि
दोर्ज्यान्तरगुणा भुक्तिस्तत्त्वनेत्रोद्धृता पुनः ४८

स्वमन्दपरिधिघ्नगुणा भगणांशोद्धृताः कलाः
कर्क्यादौ तु धनं तत्र मकरादावृणं स्मृतम् ४९

मन्दस्फुटीकृतां भुक्तिं प्रोज्झ्य शीघ्रोच्चभुक्तितः
तच्छेषं विवरेणाथ हन्यात् त्रिज्यान्त्यकर्णयोः ५०

चलकर्णहृतं भुक्तौ कर्णे त्रिज्याऽधिके धनम्
ऋणमूनेऽधिके प्रोज्झ्य शेषं वक्रगतिर्भवेत् ५१

दूरस्थितः स्वशीघ्रोच्चाद् ग्रहः शिथिलरश्मिभिः
सव्येतराकृष्टतनुर्भवेद् वक्रगतिस्तदा ५२

कृतर्तुचन्द्रैर्वेदेन्द्रैः शून्यत्र्येकैर्गुणाष्टिभिः
शररुद्रैश्चतुर्थेषु केन्द्रांशैर्भूसुतादयः ५३

भवन्ति वक्रिणस्तैस्तु स्वैः स्वैश्चक्राद्विशोधितैः
अवशिष्टांशतुल्यैः स्वैः केन्द्रैरुज्झन्ति वक्रताम् ५४

महत्वाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ
अष्टमे जीवशशिजौ नवमे तु शनैश्चरः ५५

कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं फलम्
वामं तृतीयकं मान्दं बुधभार्गवयोः फलम् ५६

स्वपातोनाद् ग्रहाज्जीवा शीघ्राद्भृगुजसौम्ययोः
विक्षेपघ्न्यन्त्यकर्णाप्ता विक्षेपस्त्रिज्यया विधोः ५७

विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता
दिग्भेदे वियुता स्पष्टा भास्करस्य यथाऽऽगता ५८

ग्रहोदयप्राणहता खखाष्टैकोद्धृता गतिः
चक्रासवो लब्धयुताः स्वाहोरात्रासवः स्मृताः ५९

क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया
हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम् ६०

क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता
त्रिज्यागुणाऽहोरात्रार्धकर्णाप्ता चरजाऽसवः ६१

तत्कार्मुकमुदक्क्रान्तौ धनहानी पृथक् स्थिते
स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते ६२

याम्यक्रान्तौ विपर्यस्ते द्विगुणे तु दिनक्षपे

विक्षेपयुक्तोनितया क्रान्त्या भानामपि स्वके ६३

भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः
ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम् ६४

रवीन्दुयोगलिप्ताश्च योगा भभोगभाजिताः
गता गम्याश्च षष्टिघ्न्यो भुक्तियोगाप्तनाडिकाः ६५

अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः
गता गम्याश्च षष्टिघ्न्यो नाड्यो भुक्त्यन्तरोद्धृताः ६६

ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्
किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः ६७

बवादीनि ततः सप्त चराख्यकरणानि च
मासेऽष्टकृत्व एकैकं करणानां प्रवर्तते ६८

तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत्
एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणाम् ६९

इति सूर्यसिद्धान्ते स्पष्टाधिकारः २

अथ त्रिप्रश्नाधिकारः ३

शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे
तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत् १

तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम्
तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः २

तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ
तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा ३

याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि ४

चतुरस्रं बहिः कुर्यात् सूत्रैर्मध्याद्विनिर्गतैः
भुजसूत्राङ्गुलैस्तत्र दत्तैरिष्टप्रभा स्मृता ५

प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममण्डले
उन्मण्डले च विषुवन्मण्डले परिकीर्त्यते ६

रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा
इष्टच्छायाविषुवतोर्मध्यमग्राऽभिधीयते ७

शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः
प्रोज्झ्य शङ्ककृतिं मूलं छाया शङ्कुर्विपर्ययात् ८

त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते
तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ९

तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः
तत्संस्कृताद् ग्रहात् क्रान्तिच्छायाचरदलादिकम् १०

स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये
प्राक् चक्रं चलितं हीने छायार्कात् करणागते ११

अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाऽधिके
एवं विषुवती छायास्वदेशे या दिनार्धजा १२

दक्षिणोत्तररेखायां सा तत्र विषुवत् प्रभा
शङ्कुच्छायाहते त्रिज्ये विषुवत्कर्णभाजिते १३

लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा
मध्यच्छाया भुजस्तेन गुणिता त्रिभमौर्विका १४

स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे
उत्तराश्चोत्त्रे याम्यास्ताः सूर्यक्रान्तिलिप्तिकाः १५

दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाश्चाक्षलिप्तिकाः
ताभ्योऽक्षज्या च तद्वर्गं प्रोज्झ्य त्रिज्याकृतेः पदम् १६

लम्बज्याऽर्कगुणाऽक्षज्या विषुवद्भाऽथ लम्बया
स्वाक्षार्कनतभागानां दिक्साम्येऽन्तरमन्यथा १७

दिग्भेदेऽपक्रमः शेषस्तस्य ज्या त्रिज्यया हता
परमापक्रमज्याप्ता चापं मेषादिगो रविः १८

कर्क्यादौ प्रोज्झ्य चक्रार्धात् तुलादौ भार्धसंयुतात्
मृगादौ प्रोज्झ्य भगणान्मध्याह्नेऽर्कः स्फुटो भवेत् १९

तन्मान्दमसकृद् वामं फलं मध्यो दिवाकरः
स्वाक्षार्कापक्रमयुतिर्दिक्साम्येऽन्तरमन्यथा २०

शेषं नतांशाः सूर्यस्य तद्बाहुज्या च कोटिजा

शङ्कुमानाङ्गुलाभ्यस्ते भुजत्रिज्ये यथाक्रमम् २१

कोटिज्यया विभज्याप्ते छायाकर्णावहर्दले
क्रान्तिज्या विषुवत्कर्णगुणाऽऽप्ता शङ्कुजीवया २२

अर्काग्रा सेष्टकर्णघ्नी मध्यकर्णोद्धृता स्वका
विषुवद्भायुताऽर्काग्रा याम्ये स्यादुत्तरो भुजः २३

विषुवत्यां विशोध्योदग्गोले स्याद् बाहुरुत्तरः
विपर्ययाद् भुजो याम्यो भवेत् प्राच्यपरान्तरे २४

माध्याह्निको भुजो नित्यं छाया माध्याह्निकी स्मृता
लम्बाद्यजीवे विषुवच्छायाद्वादशसङ्गुणे २५

क्रान्तिज्याप्ते तु तौ कर्णौ सममण्डलगे रवौ
सौम्याद्यूना यदा क्रान्तिः स्यात्तदा द्युदलश्रवः २६

विषुवच्छायया ऽभ्यस्तः कर्णो मध्याग्रयोद्धृतः
स्वक्रान्तिज्या त्रिजीवाघ्नी लम्बज्याप्ताऽग्रमौर्विका २७

स्वेष्टकर्णहता भक्ता त्रिज्ययाऽग्राऽङ्गुलादिका
त्रिज्यावर्गार्धतोऽग्रज्यावर्गोनाद् द्वादशाहतात् २८

पुनर्द्वादशनिघ्नाच्च लभ्यते यत् फलं बुधैः
शङ्कुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात् २९

तदेव करणीनाम तां पृथक् स्थापयेद् बुधः
अर्कघ्नी विषुवच्छायाऽग्रज्यया गुणिता तथा ३०

भक्ता फलाख्यं तद्वर्गसंयुक्तकरणीपदम्
फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः ३१

याम्ययोर्विदिशोः शङ्कुरेवं याम्योत्तरे रवौ
परिभ्रमति शङ्कोस्तु शङ्कुरुत्तरयोस्तु सः ३२

तत्त्रिज्यावर्गविश्लेषान्मूलं दृग्ज्याऽभिधीयते
स्वशङ्कुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते ३३

छायाकर्णौ तु कोणेषु यथास्वं देशकालयोः
त्रिज्योद्रजायुक्ता याम्यायां तद्विवर्जिता ३४

अन्त्या नतोत्क्रमज्योना स्वाहोरात्रार्धसङ्गुणा
त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः ३५

त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत्
त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत् ३६

अभीष्टच्छायया ऽभ्यस्ता त्रिज्या तत्कर्णभाजिता
दृग्ज्या तद्वर्गसंशुद्धात् त्रिज्यावर्गाच्च यत् पदम् ३७

शङ्कुः स त्रिभजीवाघ्नः स्वलम्बज्याविभाजितः
छेदः स त्रिज्ययाऽभ्यस्तः स्वाहोरात्रार्धभाजितः ३८

उन्नतज्या तया हीना स्वान्त्या शेषस्य कार्मुकम्
उत्क्रमज्याभिरेवं स्युः प्राक्पश्चार्धनतासवः ३९

इष्टाग्राघ्नी तु लम्बज्या स्वकर्णाङ्गुलभाजिता
क्रान्तिज्या सा त्रिजीवाघ्नी परमापक्रमोद्धृता ४०

तच्चापं भादिकं क्षेत्रं पदैस्तत्र भवो रविः
इष्टेऽह्नि मध्ये प्राक् पश्चाद् धृते बाहुत्रयान्तरे ४१

मत्स्यद्वयान्तरयुतेस्त्रिस्पृक्सूत्रेण भाभ्रमः

त्रिभद्युकर्णार्धगुणाः स्वाहोरात्रार्धभाजिताः ४२

क्रमादेकद्वित्रिभज्यास्तच्चापानि पृथक् पृथक्
स्वाधोऽधः परिशोध्याऽथ मेषाल्लङ्कोदयासवः ४३

खागाष्टयोऽर्थगोऽगैकाः शरत्र्यङ्कहिमांशवः
स्वदेशचरखण्डोना भवन्तीष्टोदयासवः ४४

व्यस्ता व्यस्तैर्युताः स्वैः स्वैः कर्कटाद्यास्ततस्त्रयः
उत्क्रमेण षडेवैते भवन्तीष्टास्तुलादयः ४५

गतभोग्यासवः कार्या भास्करादिष्टकालिकात्
स्वोदयासुहता भुक्तभोग्या भक्ताः खवह्निभिः ४६

अभीष्टघटिकासुभ्यो भोग्यासून् प्रविशोधयेत्
तद्वत् तदेष्यलग्नासूनेवं यातान् तथोत्क्रमात् ४७

शेषं चेत् त्रिंशताऽभ्यस्तमशुद्धेन विभाजितम्
भागहीनं च युक्तं च तल्लग्नं क्षितिजे तदा ४८

प्राक्पश्चान्नतनाडीभिस्तस्माल्लङ्कोदयासुभिः
भानौ क्षयधने कृत्वा मध्यलग्नं तदा भवेत् ४९

भोग्यासूनूनकस्याथ भुक्तासूनधिकस्य च
सम्पीड्यान्तरलग्नासूनेवं स्यात् कालसाधनम् ५०

सूर्यादूने निशाशेषे लग्नेऽर्कादधिके दिवा
भचक्रार्धयुताद् भानोरधिकेऽस्तमयात् परम् ५१

इति श्रीसूर्यसिद्धान्ते श्रीतत्त्वामृतसिञ्चिति
गतं त्रिप्रश्नकं यावत् सोपानञ्च तृतीयकम् इति त्रिप्रश्नाधिकारः ३

अथ चन्द्रग्रहणाधिकारः ४

सार्धानि षट् सहस्राणि योजनानि विवस्वतः
विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुश्शतम् १

स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ
रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः २

शशाङ्ककक्षागुणितो भाजितो वाऽर्ककक्षया
विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिकाः ३

स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता
लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम् ४

मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम्
विशोध्य लब्धं सूच्यां तु तमो लिप्तास्तु पूर्ववत् ५

भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके ६

तुल्यौ राश्यादिभिः स्यातामामावास्यान्तकालिकौ
सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिभिः समौ ७

सतैष्यपर्वनाडीनां स्वफलेनोनसंयुतौ
समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा ८

छादको भास्करस्येन्दुरधःस्थो घनवद् भवेत्
भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ९

तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः
योगार्धात् प्रोज्य यच्छेषं तावच्छन्नं तदुच्यते १०

ग्राह्यमानाधिके तस्मिन् सकलं न्यूनमन्यथा
योगार्धादधिके न स्याद् विक्षेपे ग्राससम्भवः ११

ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्
विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे १२

षष्ट्या सङ्गुण्य सूर्येन्द्वोर्भुक्त्यन्तरविभाजिते
स्यातां स्थितिविमर्दार्धे नाडिकादिफले तयोः १३

स्थित्यर्धनाडिकाऽभ्यस्ता गतयः षष्टिभाजिताः
लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः १४

तद्विक्षेपैः स्थितिदलं विमर्दार्धं तथाऽसकृत्
संसाध्यमन्यथा पाते तल्लिप्तादि फलं स्वकम् १५

स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्
स्थित्यर्धनाडिकाहीने स्पर्शो मोक्षस्तु संयुते १६

तद्वदेव विमर्दार्धनाडिका हीनसंयुते
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे १७

इष्टनाडीविहीनेन स्थित्यर्धेनार्कचन्द्रयोः
भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः १८

भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्धसङ्गुणाः
स्फुटस्थित्यर्धसंभक्ताः स्फुटाः कोटिकलाः स्मृताः १९

क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्
मानयोगार्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत् २०

मध्यग्रहणतश्चोर्ध्वमिष्टनाडीर्विशोधयेत्

स्थित्यर्धान्मौद्धिकाच्छेषं प्राग्वच्छेषं तु मौद्धिके २१

ग्राह्यग्राहकयोगार्धाच्छोध्याः स्वच्छन्नलिप्तिकाः
तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिं पदम् २२

कोटिलिप्ता रवेः स्पष्टस्थित्यर्धेनाहता हृताः
मध्येन लिप्तास्तन्नाड्यः स्थितिवद्ग्रासनाडिकाः २३

नतज्याऽक्षज्ययाऽभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम्
वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः २४

राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः
भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता २५

सोन्नतं दिनमध्यर्धं दिनार्धाप्तं फलेन तु
छिन्द्याद् विक्षेपमानानि तान्येषामङ्गुलानि तु २६

इति चन्द्रग्रहणाधिकारः ४

अथ सूर्यग्रहणाधिकारः १

मध्यलग्नसमे भानौ हरिजस्य न सम्भवः
अक्षोदङ्ग्ध्यभक्रान्तिसाम्ये नावनतेरपि १

देशकालविशेषेण यथाऽवनतिसम्भवः
लम्बनस्यापि पूर्वान्यदिग्वशाच्च तथोच्यते २

लग्नं पर्वान्तनाडीनां कुर्य्यात् स्वैरुदयासुभिः
तज्ज्याऽन्त्यापक्रमज्याघ्नी लम्बज्याप्तोदयाभिधा ३

तदा लङ्कोदयैर्लग्नं मध्यसंज्ञं यथोदितम्
तत्क्रान्त्यक्षांशसंयोगो दिक्साम्येऽन्तरमन्यथा ४

शेषं नतांशास्तन्मौवी मध्यज्या साऽभिधीयते
मध्योदयज्ययाऽभ्यस्ता त्रिज्याप्ता वर्गितं फलम् ५

मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम्
तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ६

नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती
एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ७

मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता
रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद् घटिकादिकम् ८

मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत्
धनमूनेऽसकृत् कर्म यावत् सर्वं स्थिरीभवेत् ९

दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः
तिथिघ्नत्रिज्यया भक्तो लब्धं साऽवनतिर्भवेत् १०

दृक्क्षेपात् सप्तहृताद् भवेद्वाऽवनतिः फलम्
अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ११

मध्यज्यादिग्वशात् सा च विज्ञेया दक्षिणोत्तरा
सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषिताऽन्यथा १२

तथा स्थितिविमर्दार्धग्रासाद्यं तु यथोदितम्
प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत् १३

स्थित्यर्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः
ग्रासमोक्षोद्भवं साध्यं तन्मध्यहरिजान्तरम् १४

प्राक्कपालेऽधिकं मध्याद् भवेत् प्राग्रहणं यदि
मौक्षिकं लम्बनं हीनं पश्चार्धे तु विपर्ययः १५

तदा मोक्षस्थितिदले देयं प्राग्रहणे तथा
हरिजान्तरकं शोध्यं यत्रैतत् स्याद् विपर्ययः १६

एतदुक्तं कपालैक्ये तद्भेदे लम्बनैकता
स्वे स्वे स्थितिदले योज्या विमर्दार्धेऽपि चोक्तवत् १७

इति सूर्यग्रहणाधिकारः ५

अथ छेद्यकाधिकारः ६

न छेद्यकमृते यस्माद्भेदा ग्रहणयोः स्फुटाः
ज्ञायन्ते तत् प्रवक्ष्यामि छेद्यकज्ञानमुत्तमम् १

सुसाधितायामवनौ बिन्दुं कृत्वा ततो लिखेत्
सप्तवर्गाङ्गुलेनादौ मण्डलं वलनाश्रितम् २

ग्राह्यग्राह्यकयोगार्धसम्मितेन द्वितीयकम्
मण्डलं तत्समासाख्यं ग्राह्यार्धेन तृतीयकम् ३

याम्योत्तराप्राच्यपरासाधनं पूर्ववत् दिशाम्
प्रागिन्दोर्ग्रहणं पश्चान्मोक्षोऽर्कस्य विपर्यात् ४

यथादिशं प्राग्ग्रहणं वलनं हिमदीधितेः
मौक्षिकं तु विपर्यस्तं विपरीतमिदं रवेः ५

वलनाग्रान्नयेन्मध्यं सूत्रं यद् यत्र संस्पृशेत्
तत्समासे ततो देयौ विक्षेपौ ग्रासमौक्षिकौ ६

विक्षेपाग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत्
तद्ग्राह्यबिन्दुसंस्पर्शाद् ग्रासमोक्षौ विनिर्दिशेत् ७

नित्यशोऽर्कस्य विक्षेपाः परिलेखे यथादिशम्
विपरीताः शशाङ्कस्य तद्वशादथ मध्यमम् ८

वलनं प्राङ्मुखं देयं तद्विक्षेपैकता यदि
भेदे पश्चान्मुखं देयमिन्दोर्भानोर्विपर्ययात् ९

वलनाग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत्
मध्यसूत्रेण विक्षेपं वलनाभिमुखं नयेत् १०

विक्षेपाग्राल्लिखेद् वृत्तं ग्राहकार्धेन तेन यत्
ग्राह्यवृत्तं समाक्रान्तं तद्ग्रस्तं तमसा भवेत् ११

छेद्यकं लिखता भूमौ फलके वा विपश्चिता
विपर्ययो दिशां कार्यः पूर्वापरकपालयोः १२

स्वच्छत्वाद्द्वादशांशोऽपि ग्रस्तश्चन्द्रस्य दृश्यते
लिप्तात्रयमपि ग्रस्तं तीक्ष्णत्वान्न विवस्वतः १३

स्वसंज्ञितास्त्रयः कार्या विक्षेपाग्रेषु बिन्दवः
तत्र प्राङ्मध्ययोर्मध्ये तथा मौक्तिकमध्ययोः १४

लिखेन्मत्स्यौ तयोर्मध्यान्मुखपुच्छविनिःसृतम्
प्रसार्य सूत्रद्वितयं तयोर्यत्र युतिर्भवेत् १५

तत्र सूत्रेण विलिखेच्चापं बिन्दुत्रयस्पृशा
स पन्था ग्राहकस्योक्तो येनासौ सम्प्रयास्यति १६

ग्राह्यग्राहकयोगार्धात् प्रोज्झ्येष्टग्रासमागतम्
अवशिष्टाङ्गुलसमां शलाकां मध्यबिन्दुतः १७

तयोर्मार्गोन्मुखीं दद्याद् ग्रासतः प्राग् ग्रहाश्रिताम्
विमुञ्चतो मोक्षदिशि ग्राहकाध्वानमेव सा १८

स्पृशेद्यत्र ततो वृत्तं ग्राहकार्धेन संलिखेत्
तेन ग्राह्यं यदाक्रान्तं तत् तमोग्रस्तमादिशेत् १९

मानान्तरार्धेन मितां शलाकां ग्रासदिङ्मुखीम्
निमीलनाख्यां दद्यात् सा तन्मार्गे यत्र संस्पृशेत् २०

ततो ग्राहकखण्डेन प्राग्वन्मण्डलमालिखेत्

तद्ग्राह्यमण्डलयुतिर्यत्र तत्र निमीलनम् २१

एवमुन्मीलने मोक्षदिङ्मुखीं सम्प्रसारयेत्
विलिखेन्मण्डलं प्राग्वदुन्मीलनमथोक्तवत् २२

अर्धादूने सधूम्रं स्यात् कृष्णमर्धाधिके भवेत्
विमुञ्चतः कृष्णताम्रं कपिलं सकलग्रहे २३

रहस्यमेतद्देवानां न देयं यस्य कस्यचित्
सुपरीक्षितशिष्याय देयं वत्सरवासिने २४

इति छेद्यकाधिकारः ६

अथ ग्रहयुत्यधिकारः ७

ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ
समागमः शशाङ्केन सूर्येणास्तमनं सह १

शीघ्रे मन्दाधिकेऽतीतः संयोगो भविताऽन्यथा
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्ययात् २

प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः
ग्रहान्तरकलाः स्वस्वभुक्तिलिप्तासमाहताः ३

भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः
द्वयोर्वक्रिण्यथैकस्मिन् भुक्तियोगेन भाजयेत् ४

लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति
विपर्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ ५

समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते ६

कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः
नतोन्नतं साधयित्वा स्वकाल्लग्नवशाट् तयोः ७

विषुवच्छाययाऽभ्यस्ताद् विक्षेपाद् द्वादशोद्धृतात्
फलं स्वनतनाडीघ्नं स्वदिनार्धविभाजितम् ८

लब्धं प्राच्यामृणं सौम्याद्विक्षेपात्पश्चिमे धनम्
दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा क्षयः ९

सत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः
विकलाः स्वमृणं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः १०

नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने
शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम् ११

तात्कालिकौ पुनः कार्यौ विक्षेपौ च ततस्तयोः
दिक्तुल्ये त्वन्तरं भेदे योगः शिष्टं ग्रहान्तरम् १२

कुजार्किज्ञामरेज्यानां त्रिंशदर्धार्धवर्धिताः
विष्कम्भाश्चन्द्रकक्षायां भृगोः षष्टिरुदाहृता १३

त्रिचतुःकर्णयुत्याप्तास्ते द्विघ्नास्त्रिज्यया हताः
स्फुटाः स्वकर्णास्तिथ्याप्ता भवेयुर्मानलिप्तिकाः १४

छायाभूमौ विपर्यस्ते स्वच्छायाग्रे तु दर्शयेत्
ग्रहः स्वदर्पणान्तःस्थः शङ्क्वग्रे सम्प्रदृश्यते १५

पञ्चहस्तोच्छ्रितौ शङ्कू यथादिग्भ्रमसंस्थितौ
ग्रहान्तरेण विक्षिप्तावधो हस्तनिखातगौ १६

छायाकर्णौ ततो दद्याच्छायाग्राच्छङ्कुमूर्धगौ
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् १७

स्वशङ्कुमूर्धगौ व्योम्नि ग्रहौ दृक्तुल्यतामितौ
उल्लेखं तारकास्पर्शाद् भेदे भेदः प्रकीर्त्यते १८

युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदगुः १९

समागमोंऽशादधिके भवतश्चेद्बलान्वितौ
अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान् २०

रुक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः

उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली २१

आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ २२

उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी
शशाङ्कैनैवमेतेषां कुर्यात् संयोगसाधनम् २३

भावाभावाय लोकानां कल्पनेयं प्रदर्शिता
स्वमार्गगाः प्रयान्त्येते दूरमन्योऽन्यमाश्रिताः २४

इति ग्रहयुत्यधिकारः ७

अथ भग्रहयुत्यधिकारः ८

प्रोच्यन्ते लिप्तिका भानां स्वभोगोऽथ दशाहतः
भवन्त्यतीतधिष्ण्यानां योगलिप्तायुता ध्रुवाः १

अष्टार्णवाः शून्यकृताः पञ्चषष्टिर्नगेषवः
अष्टार्था अब्धयोऽष्टागा अङ्कागा मनवस्तथा २

कृतेषवो युगरसाः शून्यबाणा वियद्रसाः
खवेदाः सागरनगा गजागाः सागरर्तवः ३

मनवोऽथ रसा वेदा वैश्वमाप्यार्धभोगगम्
आप्यस्यैवाभिजित् प्रान्ते वैश्वान्ते श्रवणस्थितिः ४

त्रिचतुष्पादयोः सन्धौ श्रविष्ठा श्रवणस्य तु
स्वभोगतो वियन्नागाः षट्कृतिर्यमलाश्विनः ५

रन्ध्राद्रयः क्रमादेषां विक्षेपाः स्वादपक्रमात्
दिङ्नासविषयाः सौम्ये याम्ये पञ्च दिशो नव ६

सौम्ये रसाः खं याम्येऽगाः सौम्ये खार्कास्त्रयोदश
दक्षिणे रुद्रयमलाः सप्तत्रिंशदथोत्तरे ७

याम्येऽध्यर्धत्रिककृता नव सार्धशरेषवः
उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि ८

दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे
भागाः षड्विंशतिः खं च दास्त्रादीनां यथाक्रमम् ९

अशीतिभागैर्याम्यायामगस्त्यो मिथुनान्तगः
विंशे च मिथुनस्यांशे मृगव्याधो व्यवस्थितः १०

विक्षेपो दक्षिणे भागैः खार्णवैः स्वादपक्रमात्
हुतभुग्ब्रह्महृदयौ वृषे द्वाविंशभागगौ ११

अष्टाभिस्त्रिंशता चैव विक्षिप्तावुत्तरेण तौ
गोलं बध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम् १२

वृषे सप्तदशे भागे यस्य याम्योंऽशकद्वयात्
विक्षेपोऽभ्यधिको भिन्द्याद्रोहिण्याः शकटं तु सः १३

ग्रहवद् द्युनिशे भानां कुर्याद् दृक्कर्म पूर्ववत्
ग्रहमेलकवच्छेषं ग्रहभुक्त्या दिनानि च १४

एष्यो हीने ग्रहे योगो ध्रुवकादधिके गतः
विपर्ययाद् वक्रगते ग्रहे ज्ञेयः समागमः १५

फाल्गुन्योर्भाद्रपदयोस्तथैवाषढयोर्द्वयोः
विशाखाश्विनिसौम्यानां योगतारोत्तरा स्मृता १६

पश्चिमोत्तरताराया द्वितीया पश्चिमे स्थिता
हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा १७

ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा
भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा १८

रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि
यथा प्रत्यवशेषाणां स्थूला स्याद् योगतारका १९

पूर्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः
प्रजापतिर्वृषान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः २०

अपांवत्सस्तु चित्राया उत्तरेंऽशैस्तु पञ्चभिः

बृहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे २१

इति नक्षत्रग्रहयुत्यधिकारः ८

अथोदयास्ताधिकारः ९

अथोदयास्तमययोः परिज्ञानं प्रकीर्त्यते
दिवाकरकराक्रान्तमूर्तीनामल्पतेजसाम् १

सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः
ऊनाः प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा २

ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः
व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः ३

सूर्यास्तकालिकौ पश्चात् प्राच्यामुदयकालिकौ
दिवा चार्कग्रहौ कुर्याद् दृक्कर्माथ ग्रहस्य तु ४

ततो लग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः
प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नान्तरासवः ५

एकादशामरेज्यस्य तिथिसंख्याऽर्कजस्य च
अस्तांशा भूमिपुत्रस्य दश सप्ताऽधिकास्ततः ६

पश्चादस्तमयोऽष्टाभिरुदयः प्राङ्नहत्त्या
प्रागस्तमुदयः पश्चादल्पत्वाद्दशभिर्भृगोः ७

एवं बुधो द्वादशभिश्चतुर्दशभिरंशकैः
वक्री शीघ्रगतिश्चार्कात् करोत्यस्तमयोदयौ ८

एभ्योऽधिकैः कालभागैर्दृश्या न्यूनैरदर्शनाः
भवन्ति लोके खचरा भानुभाग्रस्तमूर्तयः ९

तत्कालांशान्तरकला भुक्त्यन्तरविभाजिताः
दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिणः १०

तल्लग्नासुहते भुक्ती अष्टादशशतोद्धृते
स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः ११

स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठाः पुनर्वसुः
अभिजिद् ब्रह्महृदयं त्रयोदशभिरंशकैः १२

हस्तश्रवणफाल्गुन्यः श्रविष्ठा रोहिणी मघाः
चतुर्दशांशकैर्दृश्या विशाखाऽश्विनिदैवतम् १३

कृत्तिकामैत्रमूलानि सार्पं रौद्रर्क्षमेव च
दृश्यन्ते पञ्चदशभिराषाढाद्वितयं तथा १४

भरणीतिष्यसौम्यानि सौदम्यात् त्रिःसप्तकांशकैः
शेषाणि सप्तदशभिर्दृश्यादृश्यानि भानि तु १५

अष्टादशशताभ्यस्ता दृश्यांशाः स्वोदयासुभिः
विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्याऽदृश्यताऽथ वा १६

प्रागेषामुदयः पश्चादस्तो दृक्कर्म पूर्ववत्
गतैष्यदिवसप्राप्तिर्भानुभुक्त्या सदैव हि १७

अभिजिद् ब्रह्महृदयं स्वातीवैष्णववासवाः
अहिर्बुध्न्यमुदक्स्थत्वान्न लुप्यन्तेऽर्करश्मिभिः १८

इत्युदयास्ताधिकारः ९

अथ चन्द्रशृङ्गोन्नत्यधिकारः १०

उदयास्तविधिः प्राग्वत् कर्तव्यः शीतगोरपि
भागैर्द्वादशभिः पश्चाद् दृश्यः प्राग् यात्यदृश्यताम् १

रवीन्द्वोः षड्भयुतयोः प्राग्वल्लग्नान्तरासवः
एकराशौ रवीन्द्वोश्च कार्या विवरलिप्तिकाः २

तन्नाडिकाहते भुक्ती रवीन्द्वोः षष्टिभाजिते
तत्फलान्वितयोर्भूयः कर्तव्या विवरासवः ३

एवं यावत् स्थिरीभूता रवीन्द्वोरन्तरासवः
तैः प्राणैरस्तमेतीन्दुः शुक्लेऽर्कास्तमयात् परम् ४

भगणार्धं रवेर्दत्वा कार्यास्तद्विवरासवः
तैः प्राणैः कृष्णपक्षे तु शीतांशुरुदयं व्रजेत् ५

अर्केन्द्वोः क्रान्तिविश्लेषो दिक्साम्ये युतिरन्यथा
तज्ज्येन्दुरर्काद्यत्रासौ विज्ञेया दक्षिणोत्तरा ६

मध्याह्नेन्दुप्रभाकर्णसंज्ञुणा यदि सोत्तरा
तदाऽर्कघ्नाक्षजीवायां शोध्या योज्या च दक्षिणा ७

शेषं लम्बज्यया भक्तं लब्धो बाहुः स्वदिङ्मुखः
कोटिः शङ्कुस्तयोर्वर्गयुतेर्मूलं श्रुतिर्भवेत् ८

सूर्योनशीतगोर्लिप्ताः शुक्लं नवशतोद्धृताः
चन्द्रबिम्बाङ्गुलाभ्यस्तं हृतं द्वादशभिः स्फुटम् ९

दत्वाऽर्कसंज्ञितं बिन्दुं ततो बाहुं स्वदिङ्मुखम्
ततः पश्चान्मुखीं कोटिं कर्णं कोट्यग्रमध्यगम् १०

कोटिकर्णयुताद्विन्दोर्बिम्बं तात्कालिकं लिखेत्
कर्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत् ११

शुक्लं कर्णेन तद्बिम्बयोगादन्तर्मुखं नयेत्
शुक्लाग्रयाम्योत्तरयोर्मध्ये मत्स्यौ प्रसाधयेत् १२

तन्मध्यसूत्रसंयोगाद् बिन्दुत्रिस्पृग् लिखेद्धनुः
प्राग् बिम्बं यादृगेव स्यात् तादृक् तत्र दिने शशी १३

कोटच्या दिक्साधनात् तिर्यक् सूत्रान्ते शृङ्गमुन्नतम्
दर्शयेदुन्नतां कोटिं कृत्वा चन्द्रस्य साऽऽकृतिः १४

कृष्णे षड्भयुतं सूर्यं विशोध्येन्दोस्तथाऽसितम्
दद्याद् वामं भुजं तत्र पश्चिमं मण्डलं विधोः १५

इति शृङ्गोन्नत्यधिकारः १०

अथ पाताधिकारः ११

एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा
तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः १

विपरीतायनगतौ चन्द्रार्कौ क्रान्तिलिप्तिकाः
समास्तदा व्यतीपातो भगणार्धे तयोर्युतौ २

तुल्यांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः
तद्वक्क्रोधभवो वह्निर्लोकाभावाय जायते ३

विनाशयति पातोऽस्मिन् लोकानामसकृद्यतः
व्यतीपातः प्रसिद्धोऽयं संज्ञाभेदेन वैधृतः ४

स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः
सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते ५

भास्करेन्द्वोर्भचक्रान्तश्चक्रार्धावधिसंस्थयोः
दृक्तुल्यसाधितांशादियुक्तयोः स्वावपक्रमौ ६

अथौजपदगस्येन्दोः क्रान्तिर्विक्षेपसंस्कृता
यदि स्यादधिका भानोः क्रान्तेः पातो गतस्तदा ७

ऊना चेत् स्यात् तदा भावी वामं युग्मपदस्य च
पदान्यत्वं विधोः क्रान्तिर्विक्षेपाच्चेद्विशुद्ध्यति ८

क्रान्त्योर्ज्ये त्रिज्ययाऽभ्यस्ते परक्रान्तिज्ययोद्धृते
तच्चापान्तरमर्धं वा योज्यं भाविनि शीतगौ ९

शोध्यं चन्द्राद्गते पाते तत्सूर्यगतिताडितम्
चन्द्रभुक्त्या हृतं भानौ लिप्तादि शशिवत् फलम् १०

तद्वच्छशाङ्कपातस्य फलं देयं विपर्ययात्
कर्मैतदसकृत् तावद् यावत् क्रान्ती समे तयोः ११

क्रान्त्योः समत्वे पातोऽथ प्रच्चिप्तांशोनिते विधौ
हीनेऽर्धरात्रिकाद् यातो भावी तात्कालिकेऽधिके १२

स्थिरीकृतार्धरात्रेन्द्वोर्द्वयोर्विवरलिप्तिकाः
षष्टिघ्न्यश्चन्द्रभुक्त्याप्ताः पातकालस्य नाडिकाः १३

रवीन्दुमानयोगार्धं षष्ट्या सङ्गुण्य भाजयेत्
तयोर्भुक्त्यन्तरेणाऽऽप्तं स्थित्यर्धं नाडिकादि तत् १४

पातकालः स्फुटो मध्यः सोऽपि स्थित्यर्धवर्जितः
तस्य सम्भवकालः स्यात् तत्संयुक्तोऽन्त्यसंज्ञितः १५

आद्यन्तकालयोर्मध्यः कालो ज्ञेयोऽतिदारुणः
प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः १६

एकायनगतं यावदर्केन्द्वोर्मण्डलान्तरम्
सम्भवस्तावदेवास्य सर्वकर्मविनाशकृत् १७

स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः
प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा १८

रवीन्द्वोस्तुल्यता क्रान्त्योर्विषुवत्सन्निधौ यदा
द्विर्भवेद्धि तदा पातः स्यादभावो विपर्ययात् १९

शशाङ्कार्कयुतेर्लिप्ता भभोगेन विभाजिताः
लब्धं सप्तदशान्तोऽन्यो व्यतीपातस्तृतीयकः २०

सार्पेन्द्रपौष्णयधिष्ण्यानामन्त्याः पादा भसन्धयः

तदग्रभेष्वाद्यपादा गण्डान्तं नाम कीर्त्यते २१

व्यतीपातत्रयं घोरं गण्डान्तत्रितयं तथा
एतद् भसन्धित्रितयं सर्वकर्मसु वर्जयेत् २२

इत्येतत् परमं पुण्यं ज्योतिषां चरितं हितम्
रहस्यं महदाख्यातं किमन्यच्छ्रोतुमिच्छसि २३

इति श्रीसूर्यसिद्धान्ते पाताधिकारः

अथ भूगोलाध्यायः १२

अथार्कांशसमुद्भूतं प्रणिपत्य कृताञ्जलिः
भक्त्या परमयाऽभ्यर्च्य पप्रच्छेदं मयासुरः १

भगवन् किम्प्रमाणा भूः किमाकारा किमाश्रया
किंविभागा कथं चात्र सप्त पातालभूमयः २

अहोरात्रव्यवस्थां च विदधाति कथं रविः
कथं पर्येति वसुधां भुवनानि विभावयन् ३

देवासुराणामन्योन्यमहोरात्रं विपर्यात्
किमर्थं तत् कथं वा स्याद् भानोर्भगणपूरणात् ४

पित्र्यं मासेन भवति नाडीषष्ठ्या तु मानुषम्
तदेव किल सर्वत्र न भवेत् केन हेतुना ५

दिनाब्दमासहोराणामधिपा न समाः कुतः
कथं पर्येति भगणः सग्रहोऽयं किमाश्रयः ६

भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमन्तराः
ग्रहर्क्षकक्षाः किंमात्राः स्थिताः केन क्रमेण ताः ७

ग्रीष्मे तीव्रकरो भानुर्न हेमन्ते तथाविधः
कियती तत्करप्राप्तिर्मानानि कति किञ्च तैः ८

एतं मे संशयं छिन्धि भगवन् भूतभावन
अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवान् ९

इति भक्त्योदितं श्रुत्वा मयोक्तं वाक्यमस्य हि
रहस्यम्परमध्यायं ततः प्राह पुनः स तम् १०

शृणुष्वैकमना भूत्वा गुह्यमध्यात्मसंज्ञितम्
प्रवक्ष्याम्यतिभक्तानां नादेयं विद्यते मम ११

वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः
अव्यक्तो निर्गुणः शान्तः पञ्चविंशात्परोऽव्ययः १२

प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः
सङ्कर्षणोऽपः सृष्ट्वादौ तासु वीर्यमवासृजत् १३

तदण्डमभवद्धैमं सर्वत्र तमसावृतम्
तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः १४

हिरण्यगर्भो भगवानेष च्छन्दसि पठ्यते
आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते १५

परं ज्योतिस्तमःपारे सूर्योऽयं सवितेति च
पर्येति भुवनान्येष भावयन् भूतभावनः १६

प्रकाशात्मा तमोहन्ता महानित्येष विश्रुतः
ऋचोऽस्य मण्डलं सामान्युस्त्रा मूर्त्तिर्यजूंषि च १७

त्रयीमयोऽयं भगवान् कालात्मा कालकृद्विभुः
सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितम् १८

रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकम्
छन्दांस्यश्वः सप्त युक्ताः पर्यटत्येष सर्वदा १९

त्रिपादममृतं गुह्यं पादोऽयं प्रकटोऽभवत्
सोऽहङ्कारं जगत्सृष्टचै ब्रह्माणमसृजत् प्रभुः २०

तस्मै वेदान् वरान् दत्वा सर्वलोकपितामहम्

प्रतिष्ठाप्याण्डमध्येऽथ स्वयं पर्येति भावयन् २१

अथ सृष्टयां मनश्चक्रे ब्रह्माऽहङ्कारमूर्तिभृत्
मनसश्चन्द्रमा जज्ञे सूर्योऽद्ग्णोस्तेजसां निधिः २२

मनसः खं ततो वायुरग्निरापो धरा क्रमात्
गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे २३

अग्नीषोमौ भानुचन्द्रौ ततस्त्वङ्गारकादयः
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे २४

पुनर्द्वादशधाऽऽत्मानं व्यभजद् राशिसंज्ञकम्
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी २५

ततश्चराचरं विश्वं निर्ममे देवपूर्वकम्
ऊर्ध्वमध्याधरेभ्योऽथ स्रोतोभ्यः प्रकृतीः सृजन् २६

गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात्
विभागं कल्पयामास यथास्वं वेददर्शनात् २७

ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः
देवासुरमनुष्याणां सिद्धानां च यथाक्रमम् २८

ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम्
कटाहद्वितयस्यैव सम्पुटं गोलकाकृति २९

ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाऽभिधीयते
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ३०

मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः
परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः ३१

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति
विभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ३२

तदन्तरपुटाः सप्त नागासुरसमाश्रयाः
दिव्यौषधिरसोपेता रम्याः पातालभूमयः ३३

अनेकरत्ननिचयो जाम्बूनदमयो गिरिः
भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः ३४

उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः
अधस्तादसुरास्तद्वद् द्विषन्तोऽन्योन्यमाश्रिताः ३५

ततः समन्तात्परिधिः क्रमेणायं महार्णवः
मेखलेव स्थितो धात्र्या देवासुरविभागकृत् ३६

समन्तान्मेरुमध्यात् तु तुल्यभागेषु तोयधेः
द्वीपेषु दिक्षु पूर्वादिनगर्यो देवनिर्मिताः ३७

भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता
भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा ३८

याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी
पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्तिता ३९

उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्तिता
तस्यां सिद्धा महात्मानो निवसन्ति गतव्यथाः ४०

भूवृत्तपादविवरास्ताश्चान्योन्यं प्रतिष्ठिताः
ताभ्यश्चोत्तरगो मेरुस्तावानेव सुराश्रयः ४१

तासामुपरिगो याति विषुवस्थो दिवाकरः

न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते ४२

मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते
निरक्षदेशसंस्थानामुभये क्षितजाश्रये ४३

अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः
नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा ४४

मेषादौ देवभागस्थे देवानां याति दर्शनम्
असुराणां तुलादौ तु सूर्यस्तद्भागमञ्चरः ४५

अत्यासन्नतया तेन ग्रीष्मे तीव्रकरा रवेः
देवभागे सुराणां तु हेमन्ते मन्दताऽन्यथा ४६

देवासुरा विषुवति क्षितिजस्थं दिवाकरम्
पश्यन्त्यन्योऽन्यमेतेषां वामसव्ये दिनक्षपे ४७

मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरम्
सञ्चरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनाम् ४८

कर्कादीन् सञ्चरँस्तद्वद्वः पश्चार्धमेव सः
तुलादींस्त्रीन्मृगादींश्च तद्वदेव सुरद्विषाम् ४९

अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात्
अहोरात्रप्रमाणं च भानोर्भगणपूरणात् ५०

दिनक्षपार्धमेतेषामयनान्ते विपर्ययात्
उपर्यात्मानमन्योन्यं कल्पयन्ति सुरासुराः ५१

अन्येऽपि समसूत्रस्था मन्यन्तेऽधः परस्परम्
भद्राश्वकेतुमालस्था लङ्कासिद्धपुराश्रिताः ५२

सर्वत्रैव महीगोले स्वस्थानमुपरि स्थितम्
मन्यन्ते खे यतो गोलस्तस्य क्वोर्ध्वं क्व वाप्यधः ५३

अल्पकायतया लोकाः स्वस्थानात् सर्वतोमुखम्
पश्यन्ति वृत्तामप्येतां चक्राकारां वसुन्धराम् ५४

सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम्
उपरिष्टाद् भगोलोऽयं व्यक्षे पश्चान्मुखः सदा ५५

अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा
हानिवृद्धी सदा वामं सुरासुरविभागयोः ५६

मेषादौ तु सदावृद्धिरुदगुत्तरतोऽधिका
देवांशे च क्षपाहानिर्विपरीतं तथाऽऽसुरे ५७

तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे
देशक्रान्तिवशान्नित्यं तद्विज्ञानं पुरोदितम् ५८

भूवृत्तं क्रान्तिभागघ्नं भगणांशविभाजितम्
अवाप्तयोजनैरर्को व्यक्षाद्यात्युपरिस्थितः ५९

परमापक्रमादेवं योजनानि विशोधयेत्
भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः ६०

अयनान्ते विलोमेन देवासुरविभागयोः
नाडीषष्ट्या सकृदहर्निशाप्यस्मिन् सकृत् तथा ६१

तदन्तरेऽपि षष्ट्यन्ते क्षयवृद्धी अहर्निशोः
परतो विपरीतोऽयं भगोलः परिवर्तते ६२

ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः

धनुर्मृगस्थः सविता देवभागे न दृश्यते ६३

तथाचासुरभागे तु मिथुने कर्कटे स्थितः
नष्टच्छायामहीवृत्तपादे दर्शनमादिशेत् ६४

एकज्यापक्रमानीतैर्योजनैः परिवर्जिते
भूमिकक्षाचतुर्थांशे व्यक्षाच्छेषैस्तु योजनैः ६५

धनुर्मृगालिकुम्भेषु संस्थितोऽर्को न दृश्यते
देवभागेऽसुराणां तु वृषाद्ये भचतुष्टये ६६

मेरौ मेषादिचक्रार्धे देवाः पश्यन्ति भास्करम्
सकृदेवोदितं तद्वदसुराश्च तुलादिगम् ६७

भूमण्डलात् पञ्चदशे भागे देवेऽथ वासुरे
उपरिष्टाद्व्रजत्यर्कः सौम्ययाम्यायनान्तगः ६८

तदन्तरालयोश्छाया याम्योदक् सम्भवत्यपि
मेरोरभिमुखं याति परतः स्वविभागयोः ६९

भद्राश्वोपरिगः कुर्याद् भारते तूदयं रविः
रात्र्यर्धं केतुमाले तु कुरावस्तमयं तदा ७०

भारतादिषु वर्षेषु तद्वदेव परिभ्रमन्
मध्योदयार्धरात्र्यस्तकालान् कुर्यात् प्रदक्षिणम् ७१

ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरुं प्रयास्यतः
निरक्षाभिमुखं यातुर्विपरीते नतोन्नते ७२

भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः
पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ७३

सकृदुद्गतमब्दार्धं पश्यन्त्यर्कं सुरासुराः
पितरः शशिगाः पक्षं स्वदिनं च नरा भुवि ७४

उपरिष्ठस्य महती कक्षाऽल्पाऽधःस्थितस्य च
महत्या कक्षया भागा महान्तोऽल्पास्तथाऽल्पया ७५

कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः
ग्रहः कालेन महता मण्डले महति भ्रमन् ७६

स्वल्पयाऽतो बहून् भुङ्क्ते भगणान् शीतदीधितिः
महत्या कक्षया गच्छन् ततः स्वल्पं शनैश्चरः ७७

मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः
वर्षाधिपतयस्तद्वत् तृतीयाः परिकीर्तिताः ७८

ऊर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः
होरेशाः सूर्यतनयादधोऽधः क्रमशस्तथा ७९

भवेद् भकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिताडितम्
सर्वोपरिष्टाद् भ्रमति योजनैस्तैर्भमण्डलम् ८०

कल्पोक्तचन्द्रभगणा गुणिताः शशिकक्षया
आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेः ८१

सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत्
कुवासरैर्विभज्याह्नः सर्वेषां प्राग्गतिः स्मृता ८२

भुक्तियोजनजा संख्या सेन्दोर्भ्रमणसङ्गुणा
स्वकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिकाः ८३

कक्षा भूकर्णगुणिता महीमण्डलभाजिता

तत्कर्णा भूमिकर्णोना ग्रहौच्च्यं स्वं दलीकृताः ८४

खत्रयाब्धिद्विदहनाः कक्षा तु हिमदीधितेः
ज्ञशीघ्रस्याङ्कखद्वित्रिकृतशून्येन्दवस्तथा ८५

शुक्रशीघ्रस्य सप्ताग्निरसाब्धिरसषडग्यमाः
ततोऽर्कबुधशुक्राणां खखार्थैकसुरार्णवाः ८६

कुजस्याप्यङ्कशून्याङ्कषड्वेदैकभुजङ्गमाः
चन्द्रोच्चस्य कृताष्टाब्धिवसुद्वित्र्यष्टवह्नयः ८७

कृततुर्मुनिपञ्चाद्रिगुणेन्दुविषया गुरोः
स्वर्भानोर्वेदतर्काष्टद्विशैलार्थखकुञ्जराः ८८

पञ्चबाणाद्विनागर्तुरसाद्रयर्काः शनेस्ततः
भानां रविखशून्याङ्कवसुरन्ध्रशराश्विनः ८९

खव्योमखत्रयखसागरषट्कनागव्योमाष्टशून्ययमरूपनगाष्टचन्द्राः
ब्रह्माण्डसम्पुटपरिभ्रमणं समन्तादभ्यन्तरे दिनकरस्य करप्रसारः ९०

इति सूर्यसिद्धान्ते भूगोलाध्यायः १२

अथ ज्यौतिषोपनिषदध्यायः १३

अथ गुप्ते शुचौ देशे स्नातः शुचिरलङ्कृतः
सम्पूज्य भास्करं भक्त्या ग्रहान् भान्यथ गुह्यकान् १

पारम्पर्योपदेशेन यथाज्ञानं गुरोर्मुखात्
आचार्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवान् २

भूभगोलस्य रचनां कुर्यादाश्चर्यकारिणीम्
अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम् ३

दण्डं तन्मध्यगं मेरोरुभयत्र विनिर्गतम्
आधारकक्षाद्वितयं कक्षा वैषुवती तथा ४

भगणांशाङ्गुलैः कार्या दलितैस्तिस्र एव ताः
स्वाहोरात्रार्धकर्णैश्च तत्प्रमाणानुमानतः ५

क्रान्तिविक्षेपभागैश्च दलितैर्दक्षिणोत्तरैः
स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात् ६

कक्षाः प्रकल्पयेत् ताश्च कर्क्यादीनां विपर्ययात्
तद्वत् तिस्रस्तुलादीनां मृगादीनां विलोमतः ७

याम्यगोलाश्रिताः कार्याः कक्षाधाराद् द्वयोरपि
याम्योदग्गोलसंस्थानां भानामभिजितस्तथा ८

सप्तर्षीणामगस्त्यस्य ब्रह्मादीनां च कल्पयेत्
मध्ये वैषुवती कक्षा सर्वेषामेव संस्थिता ९

तदाधारयुतेरूर्ध्वमयने विषुवद्द्वयम्
विषुवत्स्थानतो भागैः स्फुटैर्भगणसञ्चरात् १०

क्षेत्राण्येवमजादीनां तिर्यगज्याभिः प्रकल्पयेत्
अयनादयनं चैव कक्षा तिर्यक् तथाऽपरा ११

क्रान्तिसंज्ञा तया सूर्यः सदा पर्येति भासयन्
चन्द्राद्याश्च स्वकैः पातैरपमण्डलमाश्रितैः १२

ततोऽपकृष्टा दृश्यन्ते विक्षेपान्तेष्वपक्रमात्
उदयक्षितिजे लग्नमस्तं गच्छच्च तद्वशात् १३

लङ्कोदयैर्यथासिद्धं खमध्योपरि मध्यमम्
मध्यक्षितिजयोर्मध्ये या ज्या साऽन्त्याऽभिधीयते १४

ज्ञेया चरदलज्या च विषुवत्क्षितिजान्तरम्
कृत्वोपरि स्वकं स्थानं मध्ये क्षितिजमण्डलम् १५

वस्त्रच्छन्नं बहिश्चापि लोकालोकेन वेष्टितम्
अमृतस्रावयोगेन कालभ्रमणसाधनम् १६

तुङ्गबीजसमायुक्तं गोलयन्त्रं प्रसाधयेत्
गोप्यमेतत् प्रकाशोक्तं सर्वगम्यं भवेदिह १७

तस्माद् गुरूपदेशेन रचयेद् गोलमुत्तमम्
युगे युगे समुच्छिन्ना रचनेयं विवस्वतः
प्रसादात् कस्यचिद् भूयः प्रादुर्भवति कामतः १८

कालसंसाधनार्थाय तथा यन्त्राणि साधयेत्
एकाकी योजयेद् बीजं यन्त्रे विस्मयकारिणि १९

शङ्कुयष्टिधनुश्चक्रैश्छायायन्त्रैरनेकधा
गुरूपदेशाद् विज्ञेयं कालज्ञानमतन्द्रितैः २०

तोययन्त्रकपालाद्यैर्मयूरनरवानरैः
ससूत्ररेणुगर्भैश्च सम्यक्कालं प्रसाधयेत् २१

पारदाराम्बुसूत्राणि शुल्वतैलजलानि च
बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः २२

ताम्रपात्रमधश्छिदं न्यस्तं कुण्डेऽमलाम्भसि
षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम् २३

नरयन्त्रं तथा साधु दिवा च विमले रवौ
छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम् २४

ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्त्वतः
ग्रहलोकमवाप्नोति पर्यायेणात्मवान् नरः २५

इति ज्योतिषोपनिषदध्यायः १३

अथ मानाध्यायः १४

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा
सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव १

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः
बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः २

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च
अयनं विषुवच्चैवं संक्रान्तेः पुण्यकालता ३

तुलादिषडशीत्यह्नां षडशीतिमुखं क्रमात्
तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु ४

षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च
मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे ५

ततः शेषानि कन्याया यान्यहानि तु षोडश
क्रतुभिस्तानि तुल्यानि पितॄनां दत्तमक्षयम् ६

भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम्
अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः ७

तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः
नैरन्तर्यात् तु संक्रान्तेर्ज्ञेयं विष्णुपदीद्वयम् ८

भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम्
कर्क्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम् ९

द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः
मेषादयो द्वादशैते मासास्तैरेव वत्सरः १०

अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः
तदर्धनाड्यः संक्रान्तेरर्वाक् पुण्यं तथा परे ११

अर्काद् विनिस्सृतः प्राचीं यद्यात्यहरहः शशी
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः १२

तिथिः करणमुद्गाहः क्षौरं सर्वक्रियास्तथा
व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते १३

त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम्
निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः १४

भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः १५

कार्तिक्यादिषु संयोगे कृत्तिकादि द्वयन्द्वयम्
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम् १६

वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ
कार्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा १७

उदयादुदयं भानोः सावनं तत् प्रकीर्तितम्
सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः १८

सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते १९

सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्
यत् प्रोक्तं तद् भवेद्दिव्यं भानोर्भगणपूरणात् २०

मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्

न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्तितम् २१

एतत् ते परमाख्यातं रहस्यं परमाद्भुतम्
ब्रह्मैतत् परमं पुण्यं सर्वपापप्रणाशनम् २२

दिव्यं चार्द्धं ग्रहाणां च दर्शितं ज्ञानमुत्तमम्
विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम् २३

इत्युक्त्वा मयमामन्त्र्य सम्यक्तेनाभिपूजितः
दिवमाचक्रमेऽर्कांशः प्रविवेश स्वमण्डलम् २४

मयोऽथ दिव्यं तज्ज्ञानं ज्ञात्वा साक्षाद् विवस्वतः
कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषम् २५

ज्ञात्वा तमृषयश्चाथ सूर्यलब्धवरं मयम्
परिबब्रुरुपेत्याथो ज्ञानं पप्रच्छुरादरात् २६

स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत्
अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मितम् २७

इति सूर्यसिद्धान्ते मानाधिकारः १४

समाप्तश्चायं ग्रन्थः